CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.
Coll. No. 613

Title Śabdakaustubha

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No. : 613 Subject : Grammar

Title : Śabdakaustubha

Author : Bhaṭṭoji Scribe : —

Date of the work : — Date of the Ms. : —

Place of the work : — Place of the Ms. : —

Size : 10.8" by 4.8" Extent : 46 to 50 foll.

Language : Sanskrit Script : Devanāgarī

Remarks : Begins and Ends abruptly.

पूर्वात्तद्गुणधातोः प्राग्वत् तस्मै भोगाभ्यां छिन्नाभिस्तन्तो निविच्छिद्य पाठः सकर्मकादपि विधानार्थः ॥ संप्रदाणे तेशत्वं ॥ भुजोऽनवने ॥ रुधादिगणे निर्दिष्टोऽर्थवत्त्र
णानानुबन्धेऽप्राग्वत् ॥ भुजो भक्षणे इति वक्तव्येऽनवन इति वचनमर्थान्तरेष्वपि यथा स्यात् ॥ भुजेर्हि पालनाभ्यवहारौ विवोपभोगश्चा तत्सालकर
णं चार्थः ॥ ओदनं भुंक्ते ॥ अभ्यवहरतीत्यर्थः ॥ बुभुजे पृथिवीपालः पृथिवीमेव केवलां ॥ दिवं मरुत्वानिव भोक्ष्यते महीं न ह्यपालनमर्थः किं तूपभो
गश्चात्तत्सालकरणं च ॥ एतेन वृद्धो जनो दुःखशतानि भुंक्ते अनुभवतीति व्याख्यातं ॥ अनवने किं महीं भुनक्ति ॥ रुधादेरेव ग्रहणं ॥ अत्र प्रतिषेधात्
पदं तिहि ॥ संयोगो विप्रयोगश्च तुपत्रमविशेष्यस्य तिहेतव इति ॥ यथा दोग्ध्री पर्यायो धेनुशब्दः ससर्गेभिविशेषे वस्याप्स्यते ॥ सवत्सा धेनुरा
नीयतां सकिशोरा सवर्करेति धा ॥ वत्सा ॥ अकिशोरा वर्करेति गौर्धेनुर्वडवाजा च क्रमेणानीयते नान्या लभ्यते हापि ॥ तेन भुज कौटिल्ये
त्यस्य तु दादेरयग्रहणं त्रेहा ॥ विभुजति पाणिमिति ॥ णेरणौ यत्कर्म णौ चेत्स कर्त्तानाध्याने ॥ रायन्त्रादात्मनेपदं स्याद्नाध्याने ॥ अणौ यत्कर्म णौ
चेदिति द्वितीयं वाक्यं ॥ कर्मेह क्रियाणिच्प्रकृत्युपात्ता या क्रिया सैव चेदेकत्वयत्तेनोच्यते इत्यर्थः ॥ स कर्त्तेत्यत्र तीयेवाक्य अणौ चेत्याद्यनुवर्त्तते ॥ क
र्मेह कारकं ॥ शब्दाधिकाराश्रयणात् ॥ णिच्प्रकृतेरर्थप्रतियत् कर्मकारकं स चेत्संभवे कर्त्तेत्यर्थः ॥ णिचश्चेत्यात्मनेपदे सिद्धेऽपि अकर्त्रभिप्रा
यार्थमिदं सूत्रं ॥ कर्त्रभिप्रायेऽपि विभाषोपपदेन प्रतीयमाने इति विकल्पबाधनार्थं च ॥ अणावकर्मकादिति परस्मैपदबाधनार्थं च ॥ नचै
कर्त्रभिप्राये चरितार्थस्यास्य विकल्पं परस्मैपदापवादं पराभ्यां बाधः स्यादिति वाच्यं ॥ पूर्वविप्रतिषेधोऽपरणात् ॥ अत्र च यथा प्राणदर्श
यतेरात्मनेपदमाध्योदाहरणमिति दिक् ॥ उदाहरणे तु कर्तृस्य भावकर्तृस्य क्रियायश्च ॥ तत्र हि कर्मवद्भावो नास्तीति वक्ष्यते ॥ प्रकृतसूत्रेणौ वत्स्यात्मनेपदं ॥

त्वात् ॥ विषयत्वापत्त्युपसर्जनविषयत्वापादनवचनो दृशिः ॥ स कर्मकारणमंशद्वयाभिधायित्वानियमात् ॥ तत्र धातूपात्तव्यापारांशः कर्त्री
भूतत्वाभूतव्यापारव्यधिकरणफलशालि कर्म ॥ तथा च पश्यंति भवं भक्ता इति प्रयोगः त्वा लुप्तत्वानेन विषयीकुर्वन्तीत्यर्थः ॥ यदा तु सैव कर्पाति
शयविवक्षया प्रेषणांशस्त्यज्यते तदा वश्यति भवः इति प्रयोगः ॥ विषयो भवतीत्यर्थः ॥ उक्तं च ॥ निवृत्तप्रेषणं कर्म स्वक्रियावयवे स्थितं ॥ निर्वर्त्यमा
ने कर्मत्वे स्वे कर्तृत्वे वतिष्ठत इति ॥ ततः पश्यंतं प्रेरयंतीति णिचि दर्शयंति भवं भक्ताः इति प्रयोगः ॥ पश्यंतीत्यर्थः ॥ उक्तं च ॥ निवृत्तप्रेषणाद्धातोः प्रा
कृतेऽर्थे णिजुच्यत इति ततः पुनर्णिजर्थस्य सौकर्यद्योतनार्थमविवक्षायां दर्शयते भवः ॥ विषयो भवतीत्यर्थः ॥ तदिह पश्यति दर्शयत्योः समानार्थत
या कर्तृस्थभावकत्वाच्च कर्मवद्भावविरहे प्रकृतसूत्रेणात्मनेपदं ॥ इह हि णिचश्चेति भतेन दर्शनाय एकार्थौ द्वितीयकक्षायामुपात्तः सएव च
तुर्थ्यामिति समानक्रियत्वमस्ति आरोहयत्कर्मप्रथमकक्षायां तदेव कर्त्री ॥ एवं आरोहयते हस्तीत्युदाहरणं ॥ आरोहंति हस्तिनं हस्तिपकाः ॥ न्यग्भा
वयंतीत्यर्थः ॥ आरोहति हस्ती न्यग्भवतीत्यर्थः ॥ ततो निवृत्तप्रेषणात् णिचि आरोहयति ॥ आरोहतीत्यर्थः ॥ ततः पुनस्स्वार्थे णिचि आरोहयते ॥ न्यग्भ
वतीत्यर्थः ॥ इहापि प्राग्वत् प्रथमतृतीययोर्द्वितीयचतुर्थ्योश्चार्थसाम्याच्चतुर्थीकक्षोदाहरणं ॥ सोऽयं निवृत्तप्रेषणापत्तः ॥ आहच ॥ न्यग्भावनं न्यग्भ
वनं रुहौ शुद्धे प्रतीयते ॥ न्यग्भावनं न्यग्भवनं ण्यंते विप्रतिपद्यते ॥ अवस्थापंचमीमाहुरण्यंतं तत्कर्मकर्तरि ॥ निवृत्तप्रेषणाद्धातोः ॥ प्रा
कृतेऽर्थे णिजुच्यत इति ॥ इह विशिष्टवाचकयोः शुद्धरूपं तयोर्व्यावंशौ वा चक्रभेदोत्तदेवागमणिच्वात्पूर्वोक्तप्रथमतृतीयकक्षाया राम
मवस्था न तु प्रथमं चतुर्थकक्षायां तु पंचमीमवस्थेति शिक्षा कार्या निर्भरतः ॥ यद्वा ॥ पश्यंति भवं भक्ताः ॥ आरोहंति हस्तिनं हस्तिपका इति प्राग्वदेवप्र ४६

थमकक्षा ॥ ततः सौकर्यद्योतनार्थं कर्मण एव प्रेषणमध्यारोप्य णिचि क्रियते ॥ दर्शयति भवः आरोहयति हस्तीति ॥ पश्यत आरोहतश्च प्रेरयती
त्यर्थः ॥ ततो णिचश्च इति भ्यां चोपात्तयोर्द्वयोरपि प्रेषणयोर्युगपत्त्यागे दर्शयते आरोहयते इत्युदाहरणं ॥ विषयो भवतीति ॥ न्यग्भवती
ति च पूर्ववदेवार्थः ॥ सोऽयमध्यारोपितप्रेषणापत्तः ॥ इहाध्यारोपितप्रेषणपक्षे दर्शयति भव आरोहयति हस्तीति द्वितीयकक्षायामति
व्याप्तिं वारयितुं समानक्रियत्वपरं द्वितीयं वाक्यं ॥ तेन प्रेषणविवक्षायां तिव्याप्तिः ॥ निवृत्तप्रेषणापत्ते दर्शयते भव आरोहयते हस्ति
न इत्यत्र वं रूपतृतीयकक्षायामतिव्याप्तिं वारयितुं आरोहयत्कर्मसत्त्वे सो कर्तेत्येवं रूपं तृतीयं वाक्यं ॥ इह तु आरोहणकर्मणो भव हस्ति
नोः कर्मत्वमेव न तु कर्तृत्वमिति नातिव्याप्तिः ॥ अत्र प्राचः ॥ आरोहयत्कर्मेति वा कर्मकर्मान्तरनिवृत्त्यर्थं ॥ तथा हि ॥ यत्र द्वौ णिच्यौ त्र सं
वादि ह्यमुं तेनेत दृष्टं आक्षिप्यते ॥ धर्मान्तरस्य चानिर्देशाद् उद्देश्यतया विधेयतं कर्मत्वमेव विधीयते ॥ तच्च विधीयमानं सामर्थ्या
रित्यस्य संनिहितत्वाच्चारोपितावस्थायामेव विधीयते ॥ न ह्यारोपितद्विधानं संभवति आरोहयत्कर्मत्वानुवादसामर्थ्यादेव तत्सिद्धेः तदेव मरोहयत्कर्म
इत्येतावतैवारोहयत्कर्मणश्चेत्तत्कर्मेत्यर्थः फलितः ॥ अनेन च कर्मान्तरनिवृत्तिः क्रियते ॥ विरोधे कर्मणोरेकं कर्मत्वं प्रतिपाद्यते ॥ सकर्मकेषु
तेरजा केन तस्य कर्तृत्वप्रतिपादनात् ॥ एकस्य युगपदेकस्यां क्रियायां कर्मकर्तृत्वयोरसंभवात् तस्मात् ॥ उद्देश्यप्रतिनिर्देश्यत्वं ज्ञेयं तस्य
हेतुनः तद्द्वौ वाक्यभेदेन कर्मान्तरनिवृत्तये ॥ तत्र रोहणचेदिति वाक्यान्तरं ॥ आरोहयदित्येव ॥ आरोहयत् प्रतिपाद्यं वस्तु तदेव रोहणं प्रतिपाद्य
चेदित्यर्थः इति व्याचख्युः ॥ अत्रेदं चिंत्यं ॥ कर्मान्तरनिवृत्तिपरं व्याख्यानं यद्यपि कैयटकौशिकसंमतं तथापि तस्य फलं दुर्लभं ॥ आरोहयमाणो हस्ती

श. कौ. स्यलमारोहयति मनुष्यानित्यस्य व्यावृत्तिः फलमिति चेत्॥ न॥ तत्र समानक्रियत्वाभावात् रोगे वेदिति वाच्यं हि प्रतिपाद्य सामर्थ्यमिति तृतीयपदमंग
४८ र्थीः स्थितं॥ न चेह तदस्ति॥ नन्वस्तु हरदत्तादिमते दोषोयं भाष्यकैयटयोस्तु समानक्रियत्वस्यानुक्तत्वात्कर्मांतरव्यावृत्तिफलकं वाक्यं सार्थकमेवे
ति चेन्न॥ न॥ भाष्यमतेपि समानक्रियत्वस्य व्याख्येयत्वात्॥ तस्यानुक्तत्वेप्य प्रत्याख्यातत्वात् अन्यथा अध्यारोपितप्रेषणे द्वितीयक
र्त्रापामतिप्रसंगात् भाष्यवार्त्तिकयोः कर्मशब्दस्य क्रियापरं तथैव व्याख्यातुं शक्यत्वाच्च॥ अभ्युपेत्यापि ब्रूमः॥ भाष्यमतेपि समानक्रि
यत्वं तथापि दर्शयते भृत्यान्राजेत्युदाहरणं व्याचक्षाणेन कैयटेन आरोपे कर्तृकर्मणी तद्भिन्नं कर्मव्यावर्त्तितमिति तात्पर्यं स्फुटं तम्॥ तथा
च मनुष्यानित्यस्यारोपे कर्तृतया गत्यर्थादुहेरोपे कर्मत्वेपि दुर्वारमात्मनेपदं॥ मनुष्यस्थलयोरारोपे कर्तृकर्मणोरेवेह कर्मत्वप्राप्तादितरकर्माभावा
त्॥ अपि चात्र सकर्तृत्वेशेषोपीह नास्ति॥ हस्तिन एव कर्तृत्वात्॥ स्यादेतत्॥ आरोहयमाणा इत्यत्रारोपे कर्मणो हस्तिन एव कर्तृकं स एव च
स्थलमारोहयतीत्यत्रापि कर्त्तेति॥ तदपि न॥ प्रत्यासत्तिबलेनैवातिप्रसंगाभावात्॥ तथा हि॥ णिजन्तादात्मनेपदं स्मारद्रोपे यत्कर्म स चेत्क
र्त्तेत्युक्ते प्रत्यासत्तेरेव लभ्यते॥ येन णिचा णिजन्तादात्मनेपदं विधित्सितं तत्राहं तौ यत्कर्म स चेत्कर्त्तेति॥ इह तु यत्रायमुपाधिः तत्र भवत
त्रात्मनेपदं॥ आरोहयमाणा इति यत्र तु न हस्तं तत्स्थलमारोहयतीति न तत्रायमुपाधिरस्ति॥ येनातिव्याप्तिः स्यात्॥ यत्तु हरदत्तेनोक्तं॥ ह
स्तिपकानारोहयति हस्तीत्यत्र माभूदिति॥ तत्रेदं वक्तव्यं॥ किमिदं अध्यारोपितप्रेषणपूर्वे द्वितीयकर्त्रापाद्युदाहरणं किं वा निवृत्तप्रे राम
षणापन्नमिति॥ नाद्यः॥ णिच्व्यापारभेदेन समानक्रियत्वाभावात्॥ न द्वितीयः॥ तत्राद्ययोः कर्त्रोरण्यंतत्वात् तत्तीपसत्तु हस्तिनः कर्तृ ४८

त्वायोगात्॥ हस्तिपकानां कर्मत्वासंभवाच्च॥ तस्माच्चतुर्थीपरमवशिष्यते॥ तत्रापि न्यग्भवतीत्यर्थपर्यवसानेन कर्मणोऽनन्वयः स्यादेव॥ स्यादेत
त्॥ दर्शयते भृत्यान्राजेति तावद्भाष्ये स्वीकृतं तत्स्वमर्थेनाय आरोपे कर्तृकर्मणी तदितरकर्मव्यवच्छेदोपि प्रेतदृष्टाहुः कैयटः॥ तस्याप्ययमा
शयः॥ आरोपयत्कर्मत्वमत्र कर्त्तरि कर्मत्वमनुहंतं कर्त्तरीत्येतत्प्रथमयापि परिगण्यते॥ पश्यपश्च यदि तिन पुंसकमनेपुंसकेनेत्येकशेषः
तेन कर्मकर्त्रोरोपे कर्मत्वेप्यदोषः॥ एवं च करेणुरारोहयते निषादिनमिति माद्यप्रयोगोप्युपपद्यत इति॥ एवं स्थिते निवृत्तप्रेषणा
ध्यारोपितप्रेषणपक्षयोर्द्वयोरपि चरमकल्पापामकर्मकतया भाष्यकैयटादिग्रंथाः सर्वे एवानन्विताः स्युः तत्किं हरदत्तं प्रत्येव पर्यनु
योगेन॥ एतावानेव हि भेदः॥ भाष्यमतेऽकर्तृकर्मणी इति व्याख्यानादुदाहरणमिदं हस्तिकारहरदत्तादिमते तु प्रत्युदाहरणं॥ आरोपे
यत्कर्मत्येव व्याख्यानादिति॥ अत्रोच्यते॥ अनन्वयस्तावद्दुरुद्धरः वाधे दृढेऽन्यसाम्यात्किं दृढेऽप्यदपि वाध्यतामिति न्यायात्॥ गभीरायां
नद्यां घोष इत्यत्र गभीरनदीपदार्थयोरभेदबोधानंतरं तीरलक्षणायामपि प्रायमिव बोधमादाय गभीरपदसार्थक्यवदिहाप्यध्यारोपितप्रे
षणापन्नद्वितीयकल्पायां कर्मण्यन्विते ततो णिजर्थेऽस्य वकर्मणोपि त्यागे णिचः कर्मपरस्यन्चप्राप्यमिकबोधमादाय कर्मवित्सार्थक्यं॥ स्व
रोप्यसंवेधोलहुरेणास्य प्राप्तमात् एषे वार्थवादेः प्राप्तस्य लहरणायामतिरिति कैयटस्वारस्यसंभवो बोध्यः॥ निष्कर्षस्तु कर्मव्यवच्छेदवाक्या
र्थो भाष्यवार्त्तिकयोरनभिमत एव॥ ऽकर्त्रीत्याप्रयोजनाभावात्॥ यद्यपि तु कर्मपदस्य क्रियापरतामोत्स्यएव॥ उदाहरणेषु तु भक्त्या निरवादे
र विवक्षायां कर्मव्यापारमात्रविवक्षिते सिद्धं भवतीत्येवाशयो बोध्यः॥ स्मरयत्येनं वनगुल्मः स्वयमेवेति भाष्यहस्त्यो वर्ण्याख्यानावसरेएन मिति

श. कौ. कर्मणो विवक्षायाः कैयटहरदत्ताभ्यामपि शिरश्चालीकृतत्वाच्च ॥ यत्तु कैयटेनैतेन शेषे वैयर्थ्येनेव नित्यस्य विवक्षितेति पुनः प्रतिज्ञादिशितेतदेवत्वापातनदिति
४८ दिक् ॥ तस्मात्तेभ्यस्त्वादीनां परित्यागो कुतः भेदपरिग्रहात् ॥ कर्मवाक्ये च तादर्थ्ये वर्णिनां सर्वमुज्ज्वलं ॥ स्यादेतत् ॥ सकर्मकाणां सर्वेषां मेषा
दुग्धा भिक्षापितत्या कर्त्रीरिकर्मवद्भावातिदेशादेव सिद्धानीह मूलोदाहरणानि ॥ न चाध्यारोपितप्रेषणापत्तेः । आरोहयते हस्तिनः कर्मत्वा
भावात् समानधातौ च कर्मवद्भावे न पचत्यादिर्नेदेव स्वतो राध्यत्योदनः स्वयमेवेति वत्कर्मवद्भावो न प्राप्नोतीति वाच्यं ॥ निवृत्तप्रेषणप्रक्रियैव
सकलजनसंग्रहात् ॥ अध्यारोपितप्रेषणापत्तेरपरित्यागेपि दृष्टत्वभावात् ॥ नन्वदृशेः कर्तृस्थभावकतया रुहेश्च कर्तृस्थक्रियतया कर्म
वद्भावो न प्राप्नोतीति वाच्यं ॥ यच्चि भिद्यादिष्वपि विलक्षणस्य दुरुपपादत्वात् ॥ विक्लेदनद्विधाभावनयोरपि कर्तृस्थतया कर्मवद्भावाति
देशस्य निर्विषयतापत्तेः ॥ तत्र व्यापारांशस्य कर्तृस्थत्वेपि विक्लित्तिद्विधाभवनरूपे फले कर्मस्थे इति यदि तर्हि दृशिरुहोरपि विषयतत्त्व
भावो कर्मस्थावितितुल्यं ॥ तस्मादिह वैषम्ये बीजं वक्तव्यमिति चेत् ॥ अत्राहुर्हरिः ॥ विशेषदर्शनं यत्र क्रिया तत्र व्यवस्थिता ॥ क्रिया
व्यवस्था त्वन्येषां शब्दैरेव प्रकल्पितेति ॥ अस्यार्थः ॥ यत्र क्रियाप्रयुक्तो विशेषो दृश्यते यथा पच्यमानेषु तण्डुलेषु यथा वा छिद्यमानेषु काष्ठे
षु तत्र क्रिया स्थिता ॥ तेन पच्यते ओदनः छिद्यते काष्ठमिति कर्मवद्भावः सिद्धः ॥ अन्येषां मते ॥ अन्येषां धातूनां शब्दैरेव क्रिया
व्यवस्था ॥ शब्देन कर्तृव्यापारस्यैव प्राधान्येनावगमात्कर्तृस्थत्वेत्यर्थः ॥ उद्देश्यतापि क्वचित्कर्मस्थांशस्य द्वे चित्तु व्यापारांशस्ये
ति औत्सर्गिकं नियामकं बोध्यं ॥ नदिह दर्शनरोहणाभ्यां विषये यन्मूलेन च विशेषानुपलम्भात्कर्तृस्थ एवेरु भावः क्रियाचा ॥ उद्देशानु राम. ४८

रोधाच्च ॥ अहं दर्शये भिक्षुमितिदुदेशः ननु अयं विषयो भवत्विति एवमहमुपरिगच्छेयमितिदुद्देशो न तु हस्तिनोन्यस्य भावो भवत्विति ॥ उपरिगमनरूपस्तत्त्वव्यापार
विशेषो हटेरर्थो न तु ल्य भावनमात्रं ॥ भूमिष्ठे हन्त स्वशालां हस्ती प्यामवनमयत्यपि आरोहतीत्यप्रयोगात् ॥ अतएव यद्वितुमर्हं छन्दसीत्यत्र भाष्ये ॥ हहि
गत्यर्थ इति ॥ अतएव चारोणा कर्तृनुर्णो कर्मत्वं ॥ यच्चि छिद्यास्तु विक्लित्तिद्विधाभवनरूपो विशेषः ॥ कर्मणि दृष्टः ॥ न तु दृशेर्नेत्र्यकारकव्यापार इति मह
वैषम्ये ॥ एवं चारुह्यते हस्तीति कर्मवद्भावं प्रदर्शयं तो भाष्यन्यायविरोधादुपेक्ष्यादिति कैयटः ॥ एतेन अविग हु ति शास्त्रार्थः स्मरतिप्रदृष्ट्वाति चो
यत्त्वस्यावशात्तस्त्नेन मोस्तु गुरवे सदेतिप्रयोगो व्याख्यातः ॥ न चैवं क्रियते इति न स्यादिति वाच्यं ॥ फलार्थतावादिनामेतद्दोषप्रसङ्गेपि भूवादि
त्रस्य भाष्यानुसारेण करोतेरप्यत प्रादुर्भावार्थतामभ्युपगच्छतामस्माकं सर्वसामञ्जस्यात् एवं च कर्तृस्थभाव क्रियेषु कर्मवद्भावाप्राप्तेर्विध्यर्थ
मिदं सूत्रमिति स्थितं भाष्ये ॥ लावयते स्वयमेवेत्यादौ तु कार्यातिदेशपक्षे परत्वात्कर्मवत्कर्मणेत्यस्यात्मनेपदं ॥ शास्त्रातिदेशे तु भावकर्मणोरि
त्येतदपेक्ष्य परत्वात्स्तोरप्यादि तत्रेणात्मनेपदं ॥ यदि त्वणौ यत्कर्तृकर्मणी तद्द्वित्रकर्म नित्यनिरभिप्रायेष्वितोस्यात्तर्हि सकर्मकाणामप्येतत्स्य
त्रोदाहरणता यतो कर्मस्थक्रियामसुदाहरणेषु ॥ नहि तत्रातिदेशः सुलभः ॥ कर्मवदकर्मकाणामितिविस्मरणत्वात् ॥ तथा नियमार्थत्व
पक्षेणं यद्दिक्लेणः प्रतिषेधार्थत्वमित्यादि भाष्यवार्तिकयोर्ग्रन्थानामप्यसामञ्जस्यं स्यादिति दिक् ॥ तस्मादिहास्मदुक्तमेव व्याख्यार्थत्रयं मुनित्रयसम्म
तं ॥ जयादित्यन्यासकारहरदत्तकैयटादिसकलग्रन्थकाराणामिह महानेव पूर्वापरविरोधो विपश्चिद्भिरुद्धर्तव्यः ॥ अस्मदुक्तिस्तु मर्तत्स्यर्पदुक्तार्थ
परिभावनीमेत्यलं बहुना ॥ यत्तु करेणुरारोहयते निषादिनमिति भाष्ये प्रयुक्तं तत्स्विच्चर्थ इति सिद्धं ॥ एतेन संततं दर्शयते गतस्मयः सता

श. कौ. र्विपत्यामिव साधुर्बंधुरुक्ता इति व्याख्यातं ॥ बंधुनात्त पश्यति तां दर्शयते ॥ यद्वा बंधुं तां रूता विपत्यामिव लोकः पश्यति तां दर्शयते इत्यर्थः ॥ आद्ये बंधुरत्र
४९ णेः कर्त्ता ॥ द्वितीये त्वणौ कर्म ॥ उभयथापि णौ कर्मत्वं निर्विवादमेवेति दिक् ॥ णेरिति किं ॥ आरोहतीति निष्ठा त्र प्रेषणस्या भूतं ॥ न चाणेरिति
दिति वाक्यशेषेऽध्याहृततत्वात् सेरेव भविष्यतीति वाच्यं ॥ आणावित्यस्याविकृतत्वात् ॥ किं च ॥ उत्तरार्थमिव यथा णेरिति वाच्यमेव तदिहैव स्पष्टार्थमुक्तं ॥
हेतुमण्णिज्ग्रहणार्थं च ॥ भीस्म्योर्हेतुभये इत्यस्यैव संभवात् ॥ तेन गणयते गणः स्वयमेवेति सिद्धं ॥ गणयति हि विभज्य भागेणावस्थापने वर्त्तते ॥ तथा
च कर्मस्थभावकात् स्यात्णिच्प्रेषणाद्धेतुमतो पुनः प्रेषणांशत्यागे सत्यात्मनेपदमिष्टं ॥ णेरिति हेतुमण्णिचः संनिधानात् हाणावित्यत्रापि तस्येव
ग्रहणं चुरादिणौ परत्वान्निर्मतकर्तृकाद्धेतुमण्ण्यंताद्विपित्सिष्यतीति ॥ पश्यति हि तिकृता गणयती त्येव रूपमवस्थाचतुष्टयेऽपि दृश्यते ॥ तत्र संख्यानि मित्त
कस्य परिच्छेदस्य स्थानविशेषस्य कृतपाकर्तृस्थस्य धातुवाच्यता माश्रित्य कर्मवद्भावप्रवृत्त्या द्वितीयावस्थायां परस्मैपदमुपपादनीयं ॥ चतुर्थ्यां व
स्थायां तु परस्मैपदमस्तु इष्टमेव ॥ णेरणावित्यत्रापि अणावकर्मकादित्यत्रेव हेतुमण्णिच एव ग्रहणमन्याप्यत्वात् ॥ तथैव भाष्ये स्थितत्वाच्च ॥ भागशाव
स्थायनपरत्वे तु द्वितीयावस्थायामप्यात्मनेपदमिति विशेषः कर्मवद्भावस्य दुर्वारत्वात् ॥ यद्वि णेरणौ तु णिश्रवणीयाद्विनिषेधान्तस्त्विति दिक् ॥
णौ वेदितिकिं निष्ठ तत्र प्रेषणात्से आरोहयंति हस्तिपकाइति तृतीयकस्यापि प्राभूत ॥ आसति हि णौ चेद्गृहणेः कृतत्वाद्गणेवेव कर्मत्वे कर्तृत्वं च
वलभ्यते ॥ नचैकस्यैभयरूपता बाधितेति वाच्यं ॥ प्रथमावस्थायां कर्मणो द्वितीयावस्थायां कर्तृत्वस्य निर्विवादत्वात् ॥ अनाध्याने किं स्मर राम
ति वनगुल्मं कोकिलः ॥ तत्रस्थे तु पीवस्थायां स्मरति वनगुल्मः ॥ उत्कण्ठापूर्वकस्मृतो विषयो भवतीत्यर्थः ॥ स्वत्वाध्याने ॥ उग्रादि: ॥ भीस्म्योर्हे ४९

तुभये ॥ आभ्यां ण्यंताभ्यां आत्मनेपदं स्यात् प्रयोजकाद्धेतुभये विस्मये च ॥ सूत्रे भयग्रहणं विस्मयस्याप्युपलक्षणं ॥ मुंडो भीषयते ॥ मिमो हे
तुभयेपु गितिषुक् ॥ विभेतेर्हेतुभय इति चैकल्पिकात्व पक्षे तु भापयते ॥ अत्रप्रुड्ड ॥ तद्धितीयार्थीकार प्रश्लेषात् न टिलो विस्मापयते ॥ नित्यं स्मे
यतेरित्यात्वं ॥ आतिङ्रीति पुक् ॥ हेतुभये किं कुञ्चिकया भाययति ॥ रूपेण विस्मापयति ॥ इह करणादुभयविस्मयौ न तु हेतोः ॥ यद्यपि हेतो
र्व्यापारे णिज्विधानात् प्रयोजकसाध्यत्वादुर्वार तथापि हेतुस्वरूपमेवान्यनिरपेक्षं भयविस्मयोः कारणमित्यर्थः ॥ विशेषणोपादानसामर्थ्या
त् ॥ अत एव भीषयति नमापयतीत्यत्र न ॥ भीष्मापयतः स्वधर्मस्य भेदेन विवक्षणात् ॥ उदाहरणे तु तादात्म्यस्य विवक्षणाद्धेतोरेव भयं ॥ एतेन मनुष्य
वार्त्यमनुवंशकेतुं ॥ विस्मापयन्निति व्याख्यातं ॥ इह हि न सिंहाद्विस्मयः किंतु मनुष्यवाचेति कारणात् अत एवात्र नित्यं स्मयतेरित्या
त्वं न ॥ तद्धितीयां ने विभेतेर्हेतुभयानुक्तस्याभयग्रहणस्य चस्मायोपलक्षणतया व्याख्यानात् ॥ केचित्तु विस्मापयन्निति पुगागमपाठः प्रामादि
कः ॥ यद्वा वाक् विस्मापयते सिंहस्तु विस्मापयमानो वाचं प्रयुंक्ते विस्मापयति ॥ ण्यंता स्मिच ॥ वाचेति तु प्रयोज्ये कर्त्तरि तृतीया न तु कर
णे तृतीया सम्बोध्यं ॥ गृधिवञ्च्योः ॥ प्रलंभने ॥ प्रतारणार्थाभ्यामाभ्यां ण्यंताभ्यामात्मनेपदं स्यात् ॥ माणवकं गर्धयते वंचयते वा ॥ प्रलंभने
किं ॥ श्वानं गर्धयति ॥ अभिकांक्षामस्योत्पादयतीत्यर्थः ॥ अहिं वंचयति ॥ वर्जयतीत्यर्थः ॥ लियः संमाननशालीनीकरणयोश्च ॥ संमा
नन शालीनीकरणयोश्चकारात्प्रलंभनेऽपि वर्त्तमानात् ण्यंतात् लीधातोरात्मनेपदं स्यात् ॥ लीङ् श्लेषणे दिवादिः ॥ लीङ् क्ष्लेषणे क्र्यादिः ॥ उभ
योरपि ग्रहणं ॥ निरनुबंधकपरिभाषातु प्रत्यय विषयिणी ॥ वामदेवाप्रपाठितिउक्तरीत्या न ज्ञापिता हि सा ॥ ज्ञापकं च सजातीयवि

श॰कौ॰ अपवच मेवेत्युत्सर्गः॥ संमानने॥ जटाभिरालापयते॥ पूजां समधिगच्छतीत्यर्थः॥ अकर्मकश्चायं॥ धात्वर्थेन क्रोडीकृतकर्मत्वात् पुत्रीयतीत्यादि
५० वत्॥ शालीनीकरणे॥ श्येनो वर्त्तिकामुल्लापयते॥ न्यक्करोतीत्यर्थः॥ प्रलंभने॥ बालमुल्लापयते॥ विभाषा लीयतेरिति णत्वात्वं विधीयते॥
तदा लिन्विषये नित्यं॥ अन्यत्र तु विकल्पः॥ व्यवस्थितविभाषा हि सा न च लीयतेरिति विहितमात्वं कथं लीनातेः स्यादिति वाच्यं॥ ली
नातिलीयत्योः यका निर्देशो यमिति सिद्धांतात् संमाननादिष्विति किं॥ बालकमुल्लापयति॥ आश्लेषयतीत्यर्थः॥ मिथ्योपपदात्
कृञोभ्यासे॥ एवं तात्कृञो मिथ्योपपदादात्मनेपदं स्यात्पौनःपुन्ये॥ पदं मिथ्या कारयते॥ सापचारं स्वरादिदुष्टमसकृदुच्चारयती
त्यर्थः॥ तित्ववीस्येत्यो रिति द्वित्वं तु न भवति॥ आत्मनेपदेनैवाभ्यासस्य द्योतितत्वात्॥ करोतिश्चेहोच्चारणवृत्तिरकर्मकः॥ एवं च तु
उच्चारणवृत्तिः सकर्मकश्च॥ मिथ्योपपदात्किं सुष्टु कारयति॥ कृञः किं॥ पदं मिथ्या वाचयति॥ अभ्यासे किं॥ सकृत्पदं मिथ्या कारयति॥
स्वरितञितः कर्त्रभिप्राये क्रियाफले॥ स्वरितेतो ञितश्च धातोरात्मनेपदं स्यात् क्रियाफले कर्तृगामिनि सति॥ यजते॥ सुनुते॥ कर्त्रभिप्राये
किं॥ यजंति याजकाः सुन्वंति॥ दक्षिणादिर्हि तु न फलं॥ उक्तं हि हरिणा॥ यस्यार्थस्य प्रसिद्ध्यर्थमारभ्यंते पचादयः॥ तत्प्रधानं फलं तेषां न लाभा
दिप्रयोजनमिति॥ पचापाचकः ष्वित्वादरू॥ केचित्तु प्रयोजकव्यापारवृत्तिभ्यो धातुभ्यस्तद्योतकमात्मनेपदमनेन विधीयते॥ कुरुते कारयती
त्यर्थः॥ कारयतेरत्यत्र तु प्रयोजकव्यापारद्वयमित्यर्थः॥ णिजंतात्तिविषये कर्त्रभिप्राये तिष्ठत्रा शोपि कर्तृपदस्य हेतुकर्तृपरत्वादुक्ता राम
र्थतात्पर्यकरवेत्याहुः उक्तं च हरिणा॥ क्रियाप्रवृत्तावात्मानं वै श्रित्वार्थपरार्थता॥ असतीवा सतीवापि विवक्षितनिबंधना॥ केषांचित्कर्त्र ५०